# Vishnukritam 1 Savitri Stotram

# विष्णुकृतं १ सावित्रीस्तोत्रम्

## Document Information

Text title : Vishnukritam 1 Savitri Stotram

File name : viShNukRRitaM1sAvitrIstotram.itx

Category : devii, devI, skandapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : skandapurANa | prabhAsakhaNDa | adhyAya 165/115-118||

Latest update : September 6, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 6, 2025

*sanskritdocuments.org*

Vishnukritam 1 Savitri Stotram

# विष्णुकृतं १ सावित्रीस्तोत्रम्

विष्णुरुवाच ।
नमोऽस्तु ते महादेवि भूर्भुवःस्वस्त्रयीमयि ।
सावित्रि दुर्गतरिणि त्वं वाणी सप्तधा स्मृता ॥ ११५॥

सर्वाणि स्तुतिशास्त्राणि लक्षणानि तथैव च ।
भविष्या सर्वशास्त्राणां त्वं तु देवि नमोऽस्तु ते ॥ ११६॥

श्वेता त्वं श्वेतरूपासि शशाङ्केन समानना ।
शशिरश्मिप्रकाशेन हरिणोरसि राजसे ।
दिव्यकुण्डलपूर्णाभ्यां श्रवणाभ्यां विभूषिता ॥ ११७॥

त्वं सिद्धिस्त्वं तथा ऋद्धिः कीर्तिः श्रीः सन्ततिर्मतिः ।
सन्ध्या रात्रिः प्रभातस्त्वं कालरात्रिस्त्वमेव च ॥ ११८॥

कर्षुकाणां यथा सीता भूतानां धारिणी तथा ॥

इति श्रीस्कन्दपुराणे प्रभासखण्डे प्रभासक्षेत्रमाहात्म्ये
पञ्चषष्ट्यधिकशततमाध्यायान्तर्गतं विष्णुकृतं
सावित्रीस्तोत्रं समाप्तम् ।

स्कन्दपुराण । प्रभासखण्ड । अध्याय १६५/११५-११८॥

skandapurANa . prabhAsakhaNDa . adhyAya 165/115-118..

Proofread by PSA Easwaran

*Vishnukritam 1 Savitri Stotram*

pdf was typeset on September 6, 2025

Please send corrections to *sanskrit@cheerful.com*